# Shri Ganeshakilaka Stotram

# શ્રીગણેશકીલકસ્તોત્રમ્

## Document Information

Text title : gaNeshakIlakastotram

File name : gaNeshakIlakastotram.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Manoj Sethuraman manoj.sethuraman at gmail.com

Proofread by : Manoj Sethuraman manoj.sethuraman at gmail.com

Source : MudgalapurANa 45th (last) Chapter of the 5th Khanda of Mudgalaurana

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# શ્રીગણેશકીલકસ્તોત્રમ્

દક્ષ ઉવાચ ।
ગણેશકીલકં બ્રહ્મન્ વદ સર્વાર્થદાયકમ્ ।
મન્ત્રાદીનાં વિશેષેણ સિદ્ધિદં પૂર્ણભાવતઃ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
કીલકેન વિહીનાશ્ચ મન્ત્રા નૈવ સુખપ્રદાઃ ।
આદૌ કીલકમેવં વૈ પઠિત્વા જપમાચરેત્ ॥ ૨॥

તદા વીર્યયુતા મન્ત્રા નાનાસિદ્ધિપ્રદાયકાઃ ।
ભવન્તિ નાત્ર સન્દેહઃ કથયામિ યથાશ્રુતમ્ ॥ ૩॥

સમાદિષ્ટં ચાઙ્ગિરસા મહ્યં ગુહ્યતમં પરમ્ ।
સિદ્ધિદં વૈ ગણેશસ્ય કીલકં શ◌ૃણુ માનદ ॥ ૪॥

અસ્ય શ્રીગણેશકીલકસ્ય શિવ ઋષિઃ । અનુષ્ટુપ્છન્દઃ ।
શ્રીગણપતિર્દેવતા । ૐ ગં યોગાય સ્વાહા । ૐ ગં બીજમ્ ।
વિદ્યાવિદ્યાશક્તિગણપતિપ્રીત્યર્થે જપે વિનિયોગઃ ।
છન્દઋષ્યાદિન્યાસાંશ્ચ કુર્યાદાદૌ તથા પરાન્ ।
એકાક્ષરસ્યૈવ દક્ષ ષડઙ્ગાનાચરેત્ સુધીઃ ॥ ૫॥

તતો ધ્યાયેદ્ગણેશાનં જ્યોતિરૂપધરં પરમ્ ।
મનોવાણીવિહીનં ચ ચતુર્ભુજવિરાજિતમ્ ॥ ૬॥

શુણ્ડાદણ્ડમુખં પૂર્ણં દ્રષ્ટું નૈવ પ્રશક્યતે ।
વિદ્યાઽવિદ્યાસમાયુક્તં વિભૂતિભિરુપાસિતમ્ ॥ ૭॥

એવં ધ્યાત્વા ગણેશાનં  માનસૈઃ પૂજયેત્પૃથક્ ।
પઞ્ચોપચારકૈર્દક્ષ તતો જપં સમાચરેત્ ॥ ૮॥

એકવિંશતિવારં તુ જપં કુર્યાત્પ્રજાપતે ।
તતઃ સ્તોત્રં સમુચ્ચાર્ય પશ્ચાત્સર્વં સમાચરેત્ ॥ ૯॥

રૂપં બલં શ્રિયં દેહિ યશો વીર્યં ગજાનન ।
મેધાં પ્રજ્ઞાં તથા કીર્તિં વિઘ્નરાજ નમોઽસ્તુ તે ॥ ૧૦॥

યદા દેવાદયઃ સર્વે કુણ્ઠિતા દૈત્યપૈઃ કૃતાઃ ।
તદા ત્વં તાન્નિહત્ય સ્મ કરોષિ વીર્યસંયુતાન્ ॥ ૧૧॥

તથા મન્ત્રા ગણેશાન કુણ્ઠિતાશ્ચ દુરાત્મભિઃ ।
શાપૈશ્ચ તાન્સવીર્યાંસ્તે કુરુષ્વ ત્વં નમો નમઃ ॥ ૧૨॥

શક્તયઃ કુણ્ઠિતાઃ સર્વાઃ સ્મરણેન ત્વયા પ્રભો ।
જ્ઞાનયુક્તાઃ સવીર્યાશ્ચ કૃતા વિઘ્નેશ તે નમઃ ॥ ૧૩॥

ચરાચરં જગત્સર્વં સત્તાહીનં યદા ભવેત્ ।
ત્વયા સત્તાયુતં ઢુણ્ઢે સ્મરણેન કૃતં ચ તે ॥ ૧૪॥

તત્ત્વાનિ વીર્યહીનાનિ યદા જાતાનિ વિઘ્નપ ।
સ્મૃત્યા તે વીર્યયુક્તાનિ પુનર્જાતાનિ તે નમઃ ॥ ૧૫॥

બ્રહ્માણિ યોગહીનાનિ જાતાનિ સ્મરણેન તે ।
યદા પુનર્ગણેશાન યોગયુક્તાનિ તે નમઃ ॥ ૧૬॥

ઇત્યાદિ વિવિધં સર્વં સ્મરણેન ચ તે પ્રભો ।
સત્તાયુક્તં બભૂવૈવ વિઘ્નેશાય નમો નમઃ ॥ ૧૭॥

તથા મન્ત્રા ગણેશાન વીર્યહીના બભૂવિરે ।
સ્મરણેન પુનર્ઢુણ્ઢે વીર્યયુક્તાન્કુરુષ્વ તે ॥ ૧૮॥

સર્વં સત્તાસમાયુક્તં મન્ત્રપૂજાદિકં પ્રભો ।
મમ નામ્ના ભવતુ તે વક્રતુણ્ડાય તે નમઃ ॥ ૧૯॥

ઉત્કીલય મહામન્ત્રાન્ જપેન સ્તોત્રપાઠતઃ ।
સર્વસિદ્ધિપ્રદા મન્ત્રા ભવન્તુ ત્વત્પ્રસાદતઃ ॥ ૨૦॥

ગણેશાય નમસ્તુભ્યં હેરમ્બાયૈકદન્તિને ।
સ્વાનન્દવાસિને તુભ્યં બ્રહ્મણસ્પતયે નમઃ ॥ ૨૧॥

ગણેશકીલકમિદં કથિતં તે પ્રજાપતે ।
શિવપ્રોક્તં તુ મન્ત્રાણામુત્કીલનકરં પરમ્ ॥ ૨૨॥

યઃ પઠિષ્યતિ ભાવેન જપ્ત્વા તે મન્ત્રમુત્તમમ્ ।

સ સર્વસિદ્ધિમાપ્નોતિ નાનામન્ત્રસમુદ્ભવામ્ ॥ ૨૩॥

એનં ત્યક્ત્વા ગણેશસ્ય મન્ત્રં જપતિ નિત્યદા ।
સ સર્વફલહીનશ્ચ જાયતે નાત્ર સંશયઃ ॥ ૨૪॥

સર્વસિદ્ધિકરં પ્રોક્તં કીલકં પરમાદ્ભુતમ્ ।
પુરાનેન સ્વયં શમ્ભુર્મન્ત્રજાં સિદ્ધિમાલભત્ ॥ ૨૫॥

વિષ્ણુર્બ્રહ્માદયો દેવા મુનયો યોગિનઃ પરે ।
અનેન મન્ત્રસિદ્ધિં તે લેભિરે ચ પ્રજાપતે ॥ ૨૬॥

ઐલઃ કીલકમાદ્યં વૈ કૃત્વા મન્ત્રપરાયણઃ ।
ગતઃ સ્વાનન્દપૂર્યાં સ ભક્તરાજો બભૂવ હ ॥ ૨૭॥

સસ્ત્રીકો જડદેહેન બ્રહ્માણ્ડમવલોક્ય તુ ।
ગણેશદર્શનેનૈવ જ્યોતીરૂપો બભૂવ હ ॥ ૨૮॥

દક્ષ ઉવાચ ।
ઐલો જડશરીરસ્થઃ કથં દેવાદિકૈર્યુતમ્ ।
બ્રહ્માણ્ડં સ દદર્શૈવ તન્મે વદ કુતૂહલમ્ ॥ ૨૯॥

પુણ્યરાશિઃ સ્વયં સાક્ષાન્નરકાદીન્ મહામતે ।
અપશ્યચ્ચ કથં સોઽપિ પાપિદર્શનયોગ્યકાન્ ॥ ૩૦॥

મુદ્ગલવાચ ।
વિમાનસ્થઃ સ્વયં રાજા કૃપયા તાન્ દદર્શ હ ।
ગાણેશાનાં જડસ્થશ્ચ શિવવિષ્ણુમુખાન્ પ્રભો ॥ ૩૧॥

સ્વાનન્દગે વિમાને યે સંસ્થિતાસ્તે શુભાશુભે ।
યોગરૂપતયા સર્વે દક્ષ પશ્યન્તિ ચાઞ્જસા ॥ ૩૨॥

એતત્તે કથિતં સર્વમૈલસ્ય ચરિતં શુભમ્ ।
યઃ શ‍ૃણોતિ સ વૈ મર્ત્યઃ ભુક્તિં મુક્તિં લભેદ્ધ્રુવમ્ ॥ ૩૩॥

ઇતિ શ્રીમુદ્ગલમહાપુરાણે પઙ્ચમે ખણ્ડે લમ્બોદરચરિતે
શ્રવણમાહાત્મ્યવર્ણનં નામ પઞ્ચચત્વારિંશત્તમોઽધ્યાયે
શ્રીગણેશકીલકસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Manoj Sethuraman manoj.sethuraman at gmail.com

Proofread by Manoj Sethuraman, PSA Easwaran

*Shri Ganeshakilaka Stotram*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*